जैनमतस्वरूपंबौद्धमतापेक्षयातत्प्राचीनत्वञ्च
MAJOR ELEMENTS OF JAINISM AND IT'S ANCIENTNESS THAN BUDDHISM

Dr. B. Keshavaprapanna Pandey

Abstract

The Jaina dharma presents upon its observance in thought, word, and deed at the individual as well as social levels. The holy text *Tattvārtha-Sūtra* sums it up in the phrase "*PARASPAROPAGRAHO JĪVANAM*"[1] (All life is mutually supportive). The major principles[2] of Jainism as given below are foundation pillars of Jain philosophy. Such as

1. *Ahiṁsā*[3] *(non-violence)*
2. *Satyam (Truthfullness)*
3. *Aparigraha(non-possessiveness)*
4. *Asteyaṁ (Non-stealing)*
5. *Brahmacarya (Celibacy)*
6. *Anekāntavāda*[4] *(Non-one-endedness or Nonsingular Conclusivity)*

Jainadharma gives much attention on Aparigraha[5] (non-possessiveness) towards material things through Self-control, Self-imposed penance etc. Thus on so many necessary things in Jainism, much consideration has been presented in this manuscript. This article consists five sub-topics such as-- (1) प्रस्तावना (Introduction), (2) जैनाचार्याणामुत्पत्तिः संस्कृतवाङ्मयेतेषाम-प्रतिमयोगदानञ्च (A brief details of Jainacharyas and their unique contribution in Sanskrit literature), (3) जैनमतस्यतात्त्विकंस्वरूपम् (Major subject of Jainism), (4) बौद्धमतापेक्षयाजैनमतस्यप्राचीनत्वम् (Antiqueness of Jainism than Buddhism), (5) बौद्धजैनमतयोर्विशेषः (Differences between Jainism and Buddhism). According to the topic, I have given the overview on the oldness (than Buddhism) and principle views of Jainism.

1. प्रस्तावना

तत्र किंप्रकारकोऽयं धर्मो जैनस्य? के च ते तीर्थकराह्वयाः जैनाचार्याः? कौ च तौ प्रसिद्धौ पार्श्वमहावीराचार्यौ जैनधर्मस्य? एको वा बहुप्रकारको वा जैनसङ्घः? समाने मते एव दृश्यमानस्यापरमतस्य कदा वा प्रादुर्भावः? यदि तादृशः सङ्घभङ्घस्तत्र तर्हि कस्माद्वा कारणात्। के नामैतेषां जैनमतावल्म्बिनामाचार्याणां धर्मग्रन्थाः? कीदृशानि च जैनमत-स्वरूपाणि? कति वा वर्णा जैनैस्स्वीकृताः? कति चाश्रमा एतैरनुसृयन्ते? कीदृशानि चाचाराद्यनुष्ठानान्येतेषाम्? किंस्वरूपाश्च यमनियमाः? के च ते साम्यवैषम्ये जैनबौद्धमतयोः? कीदृशश्च तयोः जैनबौद्धमतयोः पारस्परिकसम्बन्ध इत्येतेऽन्ये चैतादृशाः प्रश्नाः असकृत्प्रादुर्भदुर्भ-वन्त्यस्मन्मनसि विशेषतश्च यदा समुपगच्छामो वयमेतादृशे महति पुरातने जैनसमुदाये। एतादृशान्सर्वान् प्रश्नान् मनसि निधायानतिविस्तीर्णतया यथासम्भवमिह प्राचीनाचार्यग्रन्थ-कृच्छैलीं नवीनां लेखपद्धतीश्चानुसृत्य प्रस्तौमि मदीये लेखे ।

2. जैनाचार्याणामुत्पत्तिः संस्कृतवाङ्मये तेषामप्रतिमयोगदानञ्च --

प्राचीने किल सुविश्रुताभिधेयः कश्चिदृषभदेवाख्यो महामुनिरवततारास्मिन्भारतवर्षे। मिथ्यात्वमोहाज्ञानाद्यसंख्येयदुर्गुणप्रबद्धदयनीयदशापन्नान् दीनान् जीवानभिवीक्ष्य परमकरुणा-परवशः परमकारुणिको भगवान् सुकुमारहृदयः स आदिमस्तीर्थङ्करः समीचीनदर्शनज्ञानरूपं सर्वजीवोपकारकं सर्वविधात्यन्तिकदुः खापहं विशुद्धनिश्चितज्ञानादिपूर्वकचारित्रात्मकञ्च मोक्ष-शास्त्रं विरचय्य जिनदर्शननामधेयमप्रतिमं दर्शनमिममस्मिन्कल्पे प्रकटयामासेति प्रख्यापयन्त्येत-त्संप्रदायधुरन्धराः। तदनु चाचार्याजितनाथाभिधादयो महावीराख्यपर्यन्ताः त्रयोविंशतिस्ती-र्थकराः स्वस्वकालेषु निजदिव्यज्ञानकिरणैः कृपणावस्थापन्नानां किंकर्तव्यविमूढानामज्ञानिनां मोहाद्यज्ञानतमांसि अपसस्रुरिति ज्ञायते जिनग्रन्थेषु। भारतस्य पुण्यभूम्यां वाराणस्यामेव सप्तम-स्तीर्थकरः सुप्रख्यातः सुपार्श्वनाथः, तथैव त्रयोविंशतितमः महान् तीर्थकरः आचार्यः पार्श्वनाथश्च जनिमलभताम्। अपि च वाराणसीनगर्या एवानतिदूरवर्तिनि चन्द्रपुराख्ये ग्रामेऽष्टमः चन्द्रप्रभुः, एकादशः श्रेयान्सनाथश्च जैनमतसंप्रदाय उभावपि सुप्रसिद्धौ महान्तौ सारनाथक्षेत्रे बभूववतुरिति श्रूयते। एतेषु ख्यातेषु तीर्थकरेष्वेवात्यन्तं सुप्रसिद्धतमावन्तिमौ पार्श्वनाथमहावीरौ समभवतां ययोर्महानुभावयोरुपासनास्थलानि मन्दिराण्यद्यापि गोचरीभवन्ति भारतस्य बहुषु क्षेत्रविशेषेषु।

तत्र ज्ञातव्योऽयमंशो यद् बुद्धापरनामकशाक्यमुनिः गौतमसमकालीनतया सुप्रख्यातयश-स्तया चाचार्यस्य श्रीवर्धमानमहावीरस्य तस्मिन्नेव जैनमतसंस्थापकत्वमधिरोपयन्ति जिनसं-प्रदायाचार्याः केचिदस्मिन्सम्प्रदाये। परं तत्र पूर्वतीर्थकरप्रचारितमेव जिनमतं पुनः बहुविधोपायैः प्रचार्य स्वपूर्वाचार्यमतमिमं संररक्ष स महावीरपुरुषो न तु स्वबुद्धिपरिकल्पितं किञ्चन नूतनम-पूर्वमतमित्यपरे तत्रैव संप्रदायविदो वदन्ति ।

महात्माऽयं महावीरपुरुषः[6] ख्रिस्तशकात्प्राक् सप्तविंशत्युत्तरपञ्चशततमे हायने निर्वाणपद-मगमदिति जैनग्रन्थेभ्योऽवगम्यते। अपि च बौद्धग्रन्था अपि तमाचार्यं बुद्धसमकालीनं मन्य-न्तेऽर्थात् स्वकीयमतानुसारेण ख्रिस्तशकात्प्राक् पञ्चशताब्दिकमभिमन्यन्त इत्यस्ति किञ्चिदत्र वैमनस्यम्। प्रायस्तावत्सर्वैः बौद्धग्रन्थेषु तथा जैनग्रन्थेषु च कृतभूर्यनुसन्धानैः महद्भिर्विद्वद्भिः निर्विवादमिदं बाढमङ्गीक्रियते यज्जिनमतप्रतिपादकः श्रीमहावीरः शाक्यमुनेः गौतमात्प्राचीन एवेति।

पूर्वं किल गुप्तकाले मौर्यशासके चन्द्रगुप्ते महाराजे भूमिमिमां शासति सति भद्रबाहुस्वामी नामा महान् कश्चिज्जैनसंप्रदायाचार्यः स्वतपस्सामर्थ्याद् भाव्यत्यन्तकष्टकरदुर्भिक्षकालमवबुद्ध्य स्वशिष्यबृन्दैस्समन्वितः शिष्यभूतेन महाराजेन चन्द्रगुप्तेनानुगम्यमानो दक्षिणपथमगमदिति श्रूयते। ततः परमयं जैनसम्प्रदायो दिगम्बरश्वेताम्बररूपेण द्विधा बभूव इति[7] जैनग्रन्थानु-सन्धानेन ज्ञायते। तत्र आचार्यभद्रबाह्वोः येऽयायिनोऽभवन् ते दिगम्बरा, तथा उत्तरपथवर्तिनश्च जैनमतावल्म्बिनः श्वेताम्बरा इति प्रथिताश्च।

तत्र दिगम्बरजैनग्रन्थाः तावदतिप्राचीना इति विख्याताः। तत्र ख्रिस्तीयप्रथमशताब्दिकेन आचार्येण उमास्वामिना [8]**जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षेति** तत्त्वविषयात्मकम् अमूल्यं जैनमतसारस्वरूपं सप्ततत्त्वप्रतिपादनात्मकं तत्त्वार्थाधिगममोक्षशास्त्रं निरमायि। अयं महात्मा उमास्वामी महात्मनः कुन्दकुन्दाचार्यस्यात्यन्तप्रियशिष्य इति ज्ञायते। महात्मना कुन्दाचार्येणापि जैनमतस्वरूपविवेचनात्मकाः बहवो ग्रन्थाः विलिखिताः तेषु प्रख्याताः यथा– **नियमसारः, पञ्चास्तिकायः, समयसारः प्रवचनसारः, अष्टपाहुदोरयणसारो**ऽन्येऽपि बहवो ग्रन्थाश्च। अपि च प्राकृतभाषायामपि कतिपयजैनाचार्याणां तन्मतप्रतिपादकपूर्वकानां ग्रन्थविशेषानामुत्कृष्टाः रचनाः तस्मिन्काले तद्भाषाया उत्तरोत्तरवर्धने महद्विशेषयोगदानमावहन्ति। तादृशेष्वाचार्येषु महात्मा **भूतबलिश्चाग्रणी**र्भवति। महात्माऽयं **धवल-जयधवल-महाधवलाख्यान्** ग्रन्थान् प्राकृतभाषायाम् विरचय्य जैनमतस्योत्तरोत्तरप्रचारे प्राकृतभाषाया वर्धने च स्वकीयां महतीं सेवामदादिति जैनग्रन्थेभ्यो ज्ञायते। तथैव ख्रिस्तीयसप्तमशताब्दिकेन महाविदुषा नेमिचन्द्र-सिद्धान्तचक्रवर्तिना च जैनाचार्यमहानुभावेन **जयधवलैकांशमूलको** महोत्तमो **गोम्मटसार-नामको**ऽनर्घो ग्रन्थो व्यरचि । एवमेतादृशाः अनेकेऽन्ये जैनग्रन्था तदात्वे बहुभिः जैनाचार्यैर्ग्रथिता अद्यत्वेऽपि तदनुयायिभिरनेकैर्विद्वद्भिश्च तन्मतपरिपोषका ग्रन्था ग्रथ्यमानास्सन्ति विस्तरभ-यान्नात्र निर्दिश्यन्ते।

एतदतिरिच्य संस्कृतवाङ्मये जैनविदुषां[9] योगदानरूपाः बहवो न्यायव्याकरणसाहित्य-पुराणादिदर्शनग्रन्था दिगम्बरजैनप्रणिता इति विख्यातास्तेषु कतिचिदेव मुख्यतमाः प्रसङ्गादिह निर्दिश्यन्ते। तत्र व्याकरणशास्त्रे अमोघाचार्यकृता शाकटायनामोघवृत्तिः, यक्षवर्मकृतः शाकटायनचिन्तामणिः, श्रीपूज्यपादस्वामिकृतं जैनेन्द्रव्याकरणम्, अभयनन्दिकृता जैनेन्द्रमहा-वृत्तिः, श्रीप्रभाचन्द्रकृतो जैनेन्द्रशब्दार्णवः, शर्ववर्मकृतकलापव्याकरणम्, पण्डितराजवर्धमानकृतो गणरत्नमहोदधि इत्येवमेतादृशाश्च बहवो ग्रन्थाः संस्कृतवाङ्मये विलसन्ति। न्यायशास्त्रे च श्रीप्रभाचन्द्रकृतप्रमेयकमलमार्त्तण्डः, श्रीधर्मभूषणयतिकृता न्यायदीपिका, विद्यानन्दिस्वामि-कृता अष्टसहस्र्याप्तपरीक्षाप्रमाणपरीक्षा, प्रभाचन्द्रकृतो न्यायकुमुदचन्द्रोदय इत्येतादृशाः बहवो ग्रन्था न्याशास्त्रे प्रसिद्धा न्यायविदुषां गिरामलङ्कुर्वन्ति। साहित्यशास्त्रेऽपि अजितसेनकृतोऽल-ङ्कारचिन्तामणिः, वादीभसिंहकृतो गद्यचिन्तामणिः श्रीभगवज्जिनसेनकृतः पार्श्वाभ्युदयः, श्रीहस्तमल्लिकविकृता सुभद्रनाटिका इत्येतादृशाः बहवस्साहित्यग्रन्था एतेषां दृश्यन्ते। दर्शनग्रन्थेषु श्रीअकलङ्कदेवकृतं राजवार्तिकम्, विद्यानन्दिकृतं श्लोकवार्तिकम्, उमास्वामिकृतं मोक्षशास्त्रञ्चान्ये ग्रन्था प्रसिद्धाः। गणितशास्त्रे श्रीमद्भद्रस्वामिकृता भद्रबाहुसंहिता सार्धद्वयद्वीप-प्रज्ञप्तिश्च प्रकाशते। पुराणेषु च प्रसिद्धाः पुराणग्रन्थाः जिनसेनाचार्यकृतमादिपुराणम्, रविषेणकृतं पद्मपुराणम् (जैनरामायणम्) वादिराजसूरिकृतं पार्श्वपुराणमित्यादयो पुराणग्रन्थाः जैनग्रन्थेषु प्रधानतमा।

3. जैनमतस्य तात्त्विकं स्वरूपम्

इतः परं विशिष्य जैनमतस्य किं वा तात्त्विकं स्वरूपमित्यत्र किञ्चिदिव विविच्यते। प्रायः सर्वेष्वपि धर्मेषु अस्मिञ्जगति कतिपयभारतीयधर्मान्विहाय ईश्वरो जगतः कर्ता इत्याख्यायते। भारतीयेषु मतविशेषेषु अनीश्वरवादिनो मतविशेषा वेदाबाह्याः इत्याहूयन्ते। क्षणिकमात्रसुखदुःखादिकारणमज्ञानं बन्धः, तदभवश्च मोक्ष इत्यन्यान्यपर्यायशब्दैः प्रायेण सर्वाण्यपि मतानि प्रख्यापयन्ति। तत्र साङ्ख्यवद्बौद्धजैनादयोऽपि जगत्कर्तृत्वान् ईश्वर इति न वदन्ति। तत्र जैनानां मते **षड्द्रव्याणि जीवपुद्गलाकाशकालधर्माधर्माः**[10]।

तत्र जैनमते **बद्धदशायामारभ्यामुक्तेश्च चतुर्दशगुणस्थानानि**[11] प्रोक्तानि। तत्र आद्यानि पञ्चश्रावकाणामनुरोधेन। ततः सप्तस्थानानि जैनाचार्याणामभ्यासपरिपाकापेक्षया। तत्र त्रयोदशं स्थानं संयोगकेवलिनः। स एवार्हत्पदभाक्। परं तेष्वाचार्येषु केचिदेव तीर्थकरत्वं प्रतिपद्यन्ते न तु सर्वेऽपि। चतुर्दशं स्थानं पुनरयोगकेवलिनः। अन्तिमौ द्वौ जीवन्मुक्तौ परमात्मानाविति कथ्येते। अपि च जैनसम्प्रदाये सप्तपदार्था यथा क्रमेण **जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षा**[12] इत्युक्ताः। तत्राजीवपदेन पुद्गलादीनि पञ्चद्रव्याणि गृह्यन्ते आस्रवो नाम कायवाङ्मनःकर्मयोगः। बन्धो नाम पुद्गलात्मनोर्योगः। आस्रवनिरोधः संवरः। तपो निर्जरा। अजीवाज्जीवस्य पृथक्स्थितिः मोक्षः। हिंसाऽसत्यस्तेयाब्रह्मपरिग्रहाः पापानि। हिंसा नाम प्रमत्तयोगात्प्राणव्यरोपणम्। तथैवासत्यं प्रमत्तयोगाद् असदभिधानम्। स्तेयन्तु प्रमत्त-अदत्तादानम्। अब्रह्म च प्रमत्तमैथुनम्। परिग्रहश्च मूर्च्छाममत्वपरिणामः। इत्येवमादिकाः जैनमतस्याधारभूततत्त्वविषयाः प्रमुखा भवन्ति।

अपि च पुरा किल त्रय एव वर्णा[13] गुणकर्मानुरोधेन समाम्नाता ऋषभदेवेनास्मिन् कल्पे। तत्पुत्रेण ब्राह्मणवर्णोऽपि निर्मित इति जैनानामाशयः। त्रिपञ्चाशत्सन्ति चैतेषां गृह्यसंस्काराः। तत्र त्रैवर्णिकाचारविषयको भद्रबाहुसंहिताख्यो ग्रन्थः प्रसिद्धः। संस्कारकर्मणि पुराणवाक्यानि पठ्यन्त इति भाति। जैनमतानुसारेण अन्यधर्मावलम्बिनोऽपि जैनधर्मे एव गृह्यन्ते।

4. बौद्धमतापेक्षया जैनमतस्य प्राचीनत्वम्

इहेदानीं बौद्धमतापेक्षया जैनमतस्य प्रामाणिकं प्राचीनत्वं तयोर्मध्ये कश्च विशेष इत्यत्र किञ्चिदिव विलिख्यते बहूनामत्र विप्रतिपत्तित्वात् । तत्र बौद्धानां यथा प्राचीनग्रन्थाः समुलभ्यन्ते न तथा जैनानामित्यज्ञाः बहवोऽनधीतजिनशास्त्राः चिरं जिन इति शाक्यमुनिगौतमस्यैव अपरं नाम इति मन्यन्तेस्म।

तत्र जैन-बौद्ध इति उभयमतवादिनः स्वस्वान्तिमधर्मप्रवक्तारं जिन-अर्हत्-महावीर-सर्वज्ञ-सुगत-तथागत-सिद्ध बुद्ध-सम्बुद्धपरिनिर्वृत्त-मुक्तेत्यादिनामभिः निर्विशन्ति। अपि च स्वस्वतीर्थ-करमीश्वरवत् सम्मानयन्ति मूर्त्यादिभिश्च पूजयन्ति। तथा च ते स्वमतस्याहिंसालक्षणे धर्मविशेषे दत्तनिर्भरा इति च वदन्ति। तत्र उभयोरपि सम्प्रदाययोः प्राचीनग्रन्थगभीराध्ययनेन अपि च वेबरकोबीप्रभृत्याङ्गलेयानां तत्र कृतभूरिगहनाध्ययनानां लिखितपरिशीलनात्मकलेखैश्च सप्रमाणं स्पष्टं ज्ञायते यज्जैनमतं बौद्धमतादतीव भिन्नम्, अपि चैतेषामाचार्यपरम्परा भिन्ना, एषां संज्ञाविशेषाश्च भिन्नाः। न केवलमेतौ धर्मावन्यौ किन्तु परस्परविरुद्धभूतावेतौ, अपि च जिनमतं तयोः प्राचीनतरञ्च।

तत्र जिनशास्त्रज्ञातुकामाः कृतानेकपरिश्रमाः नव्याः आङ्गलेया जैकोबीप्रभृतयो[14] विद्वांसो जैनसिद्धान्तादिग्रन्था बौद्धमतग्रन्थेभ्यो महता कालेनाव्यवहिता इति स्पष्टं प्रमाणयन्ति।अपि च श्वेताम्बरसाम्प्रदायिकग्रन्था देवर्धिसमये लिखिता इति आचार्यो बाहुरपि ज्ञापयति। तत्राद्यम् उपलभ्यमानग्रन्थानां सिद्धान्तग्रन्थग्रथनकालापेक्षया अर्वाचीनत्वेऽपि तेषां सम्प्रदायपरम्परया-गतया प्राचीनत्वम् अप्रतिहतमिति पाश्चात्याः बाढं निरूपयन्ति। दिगम्बरजैनग्रन्थाः केचिद्यथा कुन्दकुन्दाचार्यकृताः प्रवचनसारादयोऽतिप्राचीनाः। ख्रिस्तीयप्रथमशताब्द्यां कुन्दकुन्दाचार्यो बभूवेति **'इन्डियन् अंण्टिक्करि'**[15] इत्याख्यस्य ग्रन्थस्य एकविंशतितमे खण्डे मुद्रितदिगम्बर-जैनपट्टवल्यनुसारेण ज्ञायते। तत्र ख्रिस्तीयपञ्चमशताब्द्यां समुत्पन्नेभ्यः श्वेताम्बरजैनदेवार्धिगणि-विरचितग्रन्थेभ्यो दिगम्बरजैनाचार्याणां कतिपयग्रन्थाः प्राचीनतरा इति सम्यक् प्रतिभाति। सम्यगधीतेषु तेषु ग्रन्थेषु ज्ञायते यज्जैनाः **जिनमहावीरार्हत्सिद्ध** इति संज्ञाभिः प्रायो निर्दिशन्ति स्वतीर्थकरान् महावीरप्रमुखान् आचार्यान्, तथा पारम्परिकबौद्धाः **सुगत-तथागतेत्यादिनामभिः** स्वाचार्यं शाक्यमुनिनम् इत्यामनन्ति ।

तथैव उभयोरपि मतयोः अन्यान्यप्यनेकानि नामानि च यथार्थाक्षराणि प्रयुज्यन्ते। बौद्धमतविरुद्धं च मनुजानां देवरूपेण क्रियमाणं पूजनं मूर्त्यापादनञ्च निर्विवादस्य सर्वसम्मतप्राचीनत्वस्य वैदिकधर्मस्य तावद् एतादृक्पूजनं प्रधानं लक्षणम् । यदि जैनैस्तदन्येभ्यः परिगृहीतमिति स्विक्रियेत तर्हि तद्वैदिकमतानुयायिभ्यो भवितुमर्हति न तु तादृक्पूजनवृद्धेभ्यो बौद्धेभ्यः। यो यो हि मतविशेषो येषां सोऽन्येभ्यो एव गृहीतोऽभविष्यदिति तु नावश्यकम्। सर्वेऽसाधारणा महापुरुषा बाढमेतादृक्पूजनकल्पने सुसमर्थाः। अनेनैवाहिंसालक्षणसाम्यं व्याख्यातम्। इदं तावदत्रानुसन्धेयम्। बौद्धाः स्वप्राचीनग्रन्थेषु महावीरप्रमुखजिनवरतिर्देशे न कुत्रापि नवीनमतप्रचारकत्वं तेष्वापादयन्ति। किन्तु प्रचलितमतप्रतिपादकत्वमेव जैनानामिति बौद्धग्रन्थकृदाशयोऽनुमीयते। अनेन जैनमतस्य बौद्धमतापेक्षया प्राचीनत्वं सिद्ध्यति।

5. बौद्धजैनमतयोर्विशेषः

अपि चेदानीं दिङ्मात्रेणोभययोर्मतयोः विद्यमानो विशेष उपस्थाप्यत इह। बौद्धमतप्रवर्तको भगवान् शाक्यमुनिः षड्वर्षाणि यावत् फलाकाङ्क्षया तपस्यामुग्रामाचर्य ततः तपसो निरर्थ-कतामवगम्य कालान्तरेण सम्बोधिं संजगाम। नवीनं च स्वकीयमेकं मतं प्रख्यापयामास। परं महात्मा महावीरः पुनर्द्वादशवर्षावधि तपस्यां विधाय तपसो बहुफलं तत्प्रभावञ्चानुभूय तपसि तदीयानशेषानप्यनुयायिनः अपि च सामान्यान् सर्वाञ्जनाञ्च प्रेरयामास इत्यस्त्ययं महान्विशेषो बौद्धजैनदर्शनयोः। किञ्च तद्विरुद्धं बौद्धमते न केवलं परमात्मनोऽस्तित्वमनावश्यकं किन्त्वा-त्मनोऽपि सत्त्वमस्ति वा नवेति न संशयापन्नोऽयमेव विषयः तत्राप्यनेका भिन्नमतयश्च। जैनमते पुनर्न केवलं जीवास्तित्वं प्रमाणितं किन्तु जले अपि च वृक्षादिस्थावरवस्तुषु अपि तद्विधीयते इति सर्वं स्पष्टमिह।

सन्दर्भाः

---

[1] उमास्वामिकृततत्त्वार्थसूत्रम् – 5.21 पृ.सं -56

[2] प्रो.महावीर-सरणजैन-कृत''भगवान्महावीरएवंजैनदर्शनम्'' -पृ-सं-221-263

---

[3] (अ) ''कोहंचमाणंचतहेवमायंलोभंचउत्थंचअज्झत्थदोसा'' (1-6-26)
पञ्चमगणधरसुधर्मास्वामिकृतसूत्रकृताङ्गसूत्रम्पृ.सं-49

(आ) ''अहिंसापरमोधर्मः''महावीर-सरणजैन-कृत-भगवान्महावीरएवंजैनदर्शनम्पृ-सं- 221-263

[4] **"**अनेकेअन्ताधर्मायित्रसोऽनेकान्तवादः'' सिद्धसेनकृतसन्मतितर्कः, पृ.सं-64

[5] ''नत्थिएरिसोपासोपडिबन्धोअत्थिसव्वजीवानांसव्वलोए'' हेमचन्द्रकृतप्रश्नव्याकरणसूत्रम्**(1-5)**

[6] भगवान्महावीर एवम् जैनदर्शनम् - पृ.सं - 41-47

[7] श्री.पं.कैलाशचन्द्रजीकृजैनधर्मः - पृ.सं. 217-266

[8] ''आसव बंधणसंवर-निज्जरमोक्खा-सपुण्णपावा जे ।
जीवाजीव-विसेसा, तेवि समासेण पभमाणो।। पृ.सं-28।।
नेमिचन्द्रकृतद्रव्यसंग्रहस्य सप्ततत्त्वाधिकारः पृ.सं 42

[9] हीरालालजैनकृत ''भारतीयसंस्कृति में जैनधर्म का योगदान'' पृ.सं- 49-210

[10] अज्जीवो पुण णेओ, पुग्गल धम्मो अधम्म आयासम् ।
कालो पुग्गल मुत्तो, रूवादिगुणो अमुत्ति सेसादु ।। श्लो.सं -17
द्रव्यसङ्ग्रहस्याजीवादिद्रव्यवर्णनम् पृ.सं-17
आकाश-काल-पुद्गल धर्मोधर्मेषु न सन्ति जीवगुणाः ।
तेषामचेनत्वं भणितं जीवस्य चेतनता ।। श्लो.सं – 55 जैनदर्शनम् – पृ.सं – 153

[11] मिच्छा सासन मिस्रो, अविरै देसव्रत सुध सम्मिधं ।
प्रमत्त अप्रमत्त भनियं अपूर्वकरन सुध ससुधं।। श्लो.सं - 658
अनिवर्त सूक्ष्मवन्तो, उवसंत कषाय षीन सुसमिधो ।
सजोग केवलिनो, अजोग केवली हुंति चैदसमो ।। श्लो.सं - 659 न्यायसमुच्चयसारः पृ.सं -11

[12] द्रव्यसङ्ग्रहस्य सप्ततत्त्वाधिकारे पृ.सं- 28

[13] जातिगोत्रादिकर्माणि शुक्लध्यानस्य हेतवः।
येषु ते स्युस्त्रियो वर्णाः शेषाः शूद्राः प्रकीर्तिताः।।(74) उत्तरपुराणम् पृ.सं–46

[14] जैन आगम इतिहास एवम् संस्कृति, पृ.सं. 1-16

[15] Indian Antiquary, Vol. 21, p. 27

उपयुक्तग्रन्थसूची

1. पुष्पदन्त-भूतबलि-कृतषट्खण्डागमः
श्रीविश्वक्सेनाचार्यविरचित-धवला-टीका-समन्वितः
हीरालालविदुषासम्पादितः, प्र.भागः
जैनसाहित्योद्धारकफंद कार्यालय, अमरावती, बरार - 1947

2. कुन्दकुन्दाचार्यविरचित-नियमसारः
ब्रह्मचारीशीतलप्रसादजीकृत-हिन्दीव्याख्यासमेतः
द्वितीयभागः, दिल्ली,वीरनिर्वाण.सं- 2498

3. हीरालालजैनकृत-भारतीयसंस्कृति में जैनधर्म का योगदान''
प्रकाशन- मध्यप्रदेश-शासन-साहित्य-परिषद्
प्रथमसंस्करणम्, मध्यप्रदेश – 1962

4. प्रो.महावीर-सरणजैन-कृत-भगवान् महावीर एवं जैनदर्शनम्
प्रकाशनम्- लोकभारतीप्रकाशन इलाहाबाद
प्रथमसंस्करण, प्रयागराज- 2015

5. आचार्य-उमास्वामिकृत-तत्त्वार्थसूत्रम्
पं.सुखलालसंघविकृतव्याख्योपेतम् ,द्वितीयसंस्करणम्,
प्रकाशनम्, पार्श्वनाथ-विद्यापीठ, वाराणसी - 1973

6. श्री.पं.कैलाशचन्द्रजीकृतजैनधर्मः
प्रकाशनम्-जीवराज जैनग्रन्थमाला, सोलापूर
प्र.संस्करणम्, सोलपूर, वि.संवत्सर-2020

7. श्रीजिनतारणस्वामिकृतन्यायस्मुच्चयसारः
प्रकाशनम्-श्रीविजयलावण्यंसूरिश्वरज्ञानमन्दिरम्
प्र.संस्करणम्,सौराष्ट्र, वि.संवत्सर-2013

8. श्रीभद्राचार्यकृत-उत्तरपुराणम्
श्रीपन्नालालकृत-हिन्दीव्याख्यासमेतम्
प्रकाशनम्- भारतीय ज्ञानपीठप्रकाशन
प्र.संस्करणम्, सौराष्ट्र-1993

9. रेखाचतुर्वेदीकृत-जैनागम इतिहास एवं संस्कृति
प्रकाशनम्, अनामिका पब्लीशर्स एन्ड डिस्ट्रीब्यूटर्स
प्र.संस्करणम्, नई दिल्ली- 2000

10. पञ्चमगणधरसुधर्मास्वामिकृतसूत्रकृताङ्गसूत्रम्
सम्पादक-अनुवादक-विवेचक,श्रीचन्दसुराना 'सरस'

प्रकाशनम्- श्रीआगम-प्रकाशन-समिति, ब्यावर
प्र.संस्करणम्, राजस्थान, 1982

11. सिद्धसेनकृतसन्मतितर्कप्रकरणम्
अभयदेवसुरिनिर्मित-तत्त्वबोधविधायिनीव्याख्यासमेतम्
पं.सुखलाल-वेचरदासाभ्यां संपादितम्, प्र.संस्करणम्
प्रकाशनम्- गुजरात-विद्यापीठम् – 1987

12. हेमचन्द्रकृतप्रश्नव्याकरणसूत्रम्
वासीलालजी-महराजकृत-सुदर्शिनीव्याख्यासमेतम्
प्रकाशकः श्रेष्ठि-श्रीशान्तिलालमहोदयः, प्र. संस्करणम् , राजकोट– 1962

13. The Indian antiquary, A journal of oriental research, Published between 1872 and 1933, Founded by the archaeologist James burgess